तत्संयुक्तादिषु प्रथमं साहसमुक्तवान्। मौलादीनामपि तमेव दण्डमाह।

"मौलवृद्धादयस्त्वन्ये दण्डगत्या पृथक् पृथक्।
विनेयाः प्रथमेनैव साहसेनानृते स्थिताः॥"

इति।

आदिग्रहणेन गोपशाकुनिकव्याधवनगोचराणां ग्रहणम्॥ * ॥ यदपि शाकुनिकादीनां पापरतत्वाल्लिङ्गदर्शन एवोपयोगो न साक्षात्सीमानिर्णये तथापि लिङ्गदर्शन एव मृषाभाषित्वसम्भवात् दण्डविधानमुपपद्यत एव। अनृते तु पृथग्दण्ड्या इत्येतद्दण्डविधानमज्ञानविषयम्।

"बहूनान्तु ग्रहीतॄणां न सर्व्वे निर्णयं यदि।
कुर्य्युर्भयाद्वा लोभाद्वा दण्ड्यास्तूत्तमसाहसम्॥"

इति ज्ञानविषये साक्ष्यादीनां कात्यायनेन दण्डान्तरविधानात्॥ * ॥ तथा साक्षिवचनभेदेऽप्ययमेव दण्डस्तेनैवोक्तः। कीर्त्तिते यदि भेदः स्याद्दण्ड्यास्तूत्तम-साहसमिति। एवमज्ञानादिना अनृतवदने साक्ष्यादीन् दण्डयित्वा पुनः सीमाविचारः प्रवर्त्तयितव्यः। अज्ञानोक्तौ दण्डयित्वा पुनः सीमां विचारयेदित्युक्ता

"त्यक्ता दुष्टांस्तु सामन्तानन्यान् मौलादिभिः सह।
संमिश्रः कारयेत् सीमामेवं धर्म्मविदो विदुः॥"

इति निर्णयप्रकारस्तेनैवोक्तः॥ * ॥ यदा पुनः सामन्तप्रभृतयो ज्ञातारश्चिह्नानि च न सन्ति तदा कथं निर्णय इत्यत आह।

"अभावे ज्ञातृचिह्नानां राजा सीम्नः प्रवर्त्तिता॥"

ज्ञातॄणां सामन्तादीनां लिङ्गादीनाञ्च। वृक्षादीनामभावे राजैव सीम्नः प्रवर्त्तिता प्रवर्त्तयिता। अन्तर्भावितोऽत्र ण्यर्थः। ग्रामद्वयमध्यवर्त्तिनीं विवादास्पदीभूतां भुवं समं प्रविभज्यास्येयं भूरस्येयमित्युभयो समर्प्य तन्मध्ये सीमालिङ्गानि कुर्य्यात्। यदा तस्यां भूमावन्यतरस्योपकारातिशयो दृश्यते तदा तस्यैव ग्रामस्य सकला भूः समर्पणीया। यथाह मनुः।

"सीमायामविषह्यायां स्वयं राजैव धर्म्मवित्।
प्रदिशेद्भूमिमेकेषामुपकारादिभिः स्थितिः॥"*

असत्यामप्यतद्भावाशङ्कायामस्याः स्मृतेर्न्यायमूलतां द्योतयितुमतिदेशमाह।

"आरामायतनग्रामनिपानोद्यानवेश्मसु।
एष एव विधिर्ज्ञेयो वर्षाम्बुप्रवहादिषु॥"

आरामः पुष्पफलोपचयहेतुः भूभागः। आयतनं निवेशनं पलालकूटाद्यर्थं विभक्तो प्रदेशः ग्रामः प्रसिद्धः। ग्रामग्रहणञ्च नगराद्युपलक्षणम्। निपानं पानीयस्थानं कूपवापीप्रभृतिकम्। उद्यानं क्रीड़ार्थाभूमिः। वेश्म गृहम्। एतेष्वारामादिष्वयमेव सामन्तसाक्ष्यादिलक्षणो विधिर्ज्ञातव्यः। तथा प्रवर्षणोद्भूतेषु जलप्रवाहेषु अनयोर्गृहयोर्मध्ये न जलौघः प्रवहत्यनयोर्वेत्येवं प्रकारे विवादे आदिग्रहणात् प्रासादादिष्वपि प्राचीन एव विधिर्ज्ञेयः वेदितव्यः। तथा च कात्यायनः।

"क्षेत्रकूपतड़ागानां केदारारामयोरपि।
गृहप्रसादावसथनृपदेवगृहेषु च॥" इति॥*॥

सीमानिर्णयमुक्ता तत्प्रसङ्गेन मर्य्यादाप्रभेदनादौ दण्डमाह।

"मर्य्यादायाः प्रभेदे तु सीमातिक्रमणे तथा।
क्षेत्रस्य हरणे दण्डा अधमोत्तममध्यमाः॥"

अनेकक्षेत्रव्यवच्छेदिका साधारणी भूमर्य्यादा तस्याः प्रकर्षेण भेदने सीमातिक्रमणे सीमामतिलङ्घ्य कर्षणे क्षेत्रस्य च भयादिप्रदर्शनेन हरणे यथाक्रमेणाधमोत्तममध्यमदण्डा वेदितव्याः। क्षेत्रग्रहणञ्च गृहारामाद्युपलक्षणार्थम्। यदा पुनः स्वीयभ्रान्त्या क्षेत्रादिकमपहरति तदा द्विशतो दमो वेदितव्यः॥ यथाह मनुः।

"गृहं तड़ागमारामं क्षेत्रं वा भीषया हरन्।
शतानि पञ्च दण्ड्यः स्यादज्ञानाद्द्विशतो दमः॥"

इति॥

अपक्रियमाणक्षेत्रादि भूयस्त्वपर्य्यालोचनया कदाचिदुत्तमोऽपि दण्डः प्रयोक्तव्यः। अत एवाह।

"वधः सर्व्वस्वहरणं पुरान्निर्वासनाङ्कने।
तदङ्गच्छेद इत्युक्तो दण्ड उत्तमसाहसः॥"

इति॥ * ॥

यः पुनः परक्षेत्रे सेतुकूपादिकं प्रार्थनया अर्थदानेन वा लब्धानुज्ञो निर्मातुमिच्छति तं निषेधतः क्षेत्रस्वामिन एव दण्ड इत्यत आह।

"न निषेध्योऽल्पबाधस्तु सेतुः कल्याणकारकः।
परभूमिं हरन् कूपः स्वल्पक्षेत्रो बहूदकः॥"

परकीयां भूमिमपहरन्नाशयन्नपि सेतुर्जलप्रवाहबन्धः क्षेत्रस्वामिना न प्रतिषेध्यः स चेदीषत्पीड़ाकरो बहूपकारकश्च भवति। कूपश्चाल्पक्षेत्रव्यापित्वेनाल्पबाधो बहूदकत्वेन बहूपकारको नैव निवारणीयः। कूपग्रहणञ्च वापीपुष्करिण्याद्युपलक्षणार्थम्। यदा पुनरसौ सर्व्वक्षेत्रवर्त्तितया बहुबाधो नद्यादिसमीपक्षेत्रवर्त्तितया वा अल्पोपकारकस्तदासौ निषेध्य इत्यर्थादुक्तम्भवति॥ * ॥ सेतोश्च द्वैविध्यमुक्तं नारदेन।

"सेतुश्च द्विविधो ज्ञेयः खेयो बन्ध्यस्तथैव च।
तोयप्रवर्त्तनात् खेयो बन्ध्यः स्यात्तन्निवर्त्तनात्॥"

इति॥

यदा त्वन्यनिर्म्मितं सेतुं भेदनादिना नष्टं स्वयं संस्करोति तदा पूर्व्वस्वामिनं तद्वंश्यनृपं वा पृष्ट्वैव संस्कुर्य्यात्। यथाह नारदः।

"पूर्व्वप्रवृत्तमुत्सन्नमपृष्ट्वा स्वामिनन्तु यः।
सेतुं प्रवर्त्तयेत् कश्चित् न स तत्फलभाक् भवेत्
मृते तु स्वामिनि पुनस्तद्वंश्ये वापि मानवे।
राजानमामन्त्र्य ततः कुर्य्यात् सेतुप्रवर्त्तनम्॥"

इति॥ * ॥

क्षेत्रस्वामिनं प्रति उपदिष्टमिदानीं सेतोः प्रवर्त्तयितारं प्रति चाह।

"स्वामिने योऽनिवेद्यैव क्षेत्रे सेतुं प्रवर्त्तयेत्।
उत्पन्ने स्वामिनो भोगस्तदभावे महीपतेः॥"

क्षेत्रस्वामिनमनभ्युपगम्य तदभावे राजानं वा यः परक्षेत्रे सेतुं प्रवर्त्तयत्यसौ न फलभाग्भवत्यपि तु तदुत्पन्ने फले क्षेत्रस्वामिनो भोगस्तदभावे राज्ञः। तस्मात् प्रार्थनयार्थदानेन वा क्षेत्रस्वामिनं तदभावे राजानं वाप्यनुज्ञाप्यैव परक्षेत्रे सेतुः प्रवर्त्तनीय इति तात्पर्य्यार्थः॥*॥ क्षेत्रस्वामिना सेतुर्न प्रतिषेध्य इत्युक्तमिदानीं तस्यैव प्रसक्तानुप्रसक्त्या क्वचिद्विध्यन्तरमाह।

"फालाहतमपि क्षेत्रं न कुर्य्याद्यो न कारयेत्
स प्रदाप्यः कृष्टफलं क्षेत्रमन्येन कारयेत्॥"

यः पुनः क्षेत्रस्वामिनः पार्श्वेऽहमिदं क्षेत्रं कृषामि इत्यङ्गीकृत्य पश्चादुत्सृजति न चान्येन कर्षयति तत्र क्षेत्रं यद्यपि फलाहतमीषद्धलेन विदारितं न सम्यग्बीजवापार्हं तथापि तस्याकृष्टस्यफलंयावत्तत्रोत्पद्यतेऽर्हं सामन्तादिकल्पितं तावदसौ कर्षको दापनीयः। तच्च क्षेत्रं पूर्व्वकर्षकादुच्छिद्यान्येन कारयेत्। इति सीमाविवादप्रकरणम्। इति मिताक्षरा॥ * ॥ अपि च।

"सीमां प्रति समुत्पन्ने विवादे ग्रामयोर्द्वयोः।
ज्यैष्ठे मासि नयेत् सीमां सुप्रकाशेषु सेतुषु॥
सीमावृक्षांश्च कुर्व्वीत न्यग्रोधाश्वत्थकिंशुकान्।
शाल्मलीन् शालतालांश्च क्षीरिणश्चैव पादपान्॥
गुल्मान् वेणूंश्च विविधान् शमीवल्ली स्थलानि च
शरान् कुब्जकगुल्मांश्च तथा सीमा न नश्यति॥
तड़ागान्युदपानानि वाप्यः प्रस्रवणानि च।
सीमासन्धिषु कार्य्याणि देवतायतनानि च॥
उपच्छन्नानि चान्यानि सीमालिङ्गानि कारयेत्
सीमाज्ञाने नृणां वीक्ष्य नित्यं लोके विपर्य्ययम्
अश्मनोऽस्थीनि गोबालान् तुषान् भस्म कपालिकाः।
करीषमिष्टकाङ्गारान् शर्करा बालुकास्तथा॥
यानि चैवं प्रकाराणि कालाद्भूमिर्न भक्षयेत्।
तानि सन्धिषु सीमायामप्रकाशानि कारयेत्॥
एतैर्लिङ्गैर्नयेत् सीमां राजा विवदमानयोः।
पूर्व्वभुक्त्या च सततमुदकस्यागमेन च॥
यदि संशय एव स्यात् लिङ्गानामपि दर्शने।
साक्षिप्रत्यय एव स्यात् सीमावादविनिर्णयः॥
ग्रामीयककुलानाञ्च समक्षं सीम्नि साक्षिणः।
प्रष्टव्याः सीमलिङ्गानि तयोश्चैव विवादिनोः॥
ते पृष्टास्तु तथा ब्रूयुः समस्ताः सीम्नि निश्चयम्
निबध्नीयात्तथा सीमां सर्व्वांस्तांश्चैव नामतः॥
शिरोभिस्त गृहीत्वोर्व्वीं स्रग्विणो रक्तवाससः
सुकृतैः शापिताः स्वैः स्वैर्नयेयुस्ते समञ्जसम्॥
यथोक्तेन नयन्तस्ते पूयन्ते सत्यसाक्षिणः।
विपरीतं नयन्तस्तु दाप्याः स्युर्द्विशतं दमम्॥
साक्ष्यभावे तु चत्वारो ग्रामाः सामन्तवासिनः।
सीमाविनिर्णयं कुर्य्युः प्रयता राजसन्निधौ॥
सामन्तानामभावे तु मौलानां सीम्नि साक्षिणाम्॥
इमानप्यनुयुञ्जीत पुरुषान् वनगोचरान्॥